| | | | |
|---|---|---|---|
| [1]प्राट्, | शब्दप्राट्-प्राड्-प्राशौ-प्राशः ; | — | — |
| [2]पृष्टम्-पृष्टः-पृष्टवान्, | प्रच्छितः, | पिपृच्छिषितः, | परीपृच्छितः-तवान् ; |
| प्रच्छः, | प्रच्छः, | [A]पिपृच्छिषुः, | परीपृच्छः ; |
| प्रष्टव्यम्, | प्रच्छयितव्यम्, | पिपृच्छिषितव्यम्, | परीपृच्छितव्यम् ; |
| प्रच्छनीयम्, | प्रच्छनीयम्, | पिपृच्छिषणीयम्, | परीपृच्छनीयम् ; |
| प्रच्छ्यम्, | प्रच्छ्यम्, | पिपृच्छिष्यम्, | परीपृच्छ्यम् ; |
| ईषत्प्रच्छः-दुष्प्रच्छः-सुप्रच्छः ; | | — | — |
| पृच्छ्यमानः, | प्रच्छ्यमानः, | पिपृच्छिष्यमाणः, | परीपृच्छ्यमानः ; |
| प्रच्छः, | [3]प्रश्नः, प्रच्छः, | पिपृच्छिषः, | परीपृच्छः ; |
| प्रष्टुम्, | प्रच्छयितुम्, | पिपृच्छिषितुम्, | परीपृच्छितुम् ; |
| पृष्टिः, [4]पृच्छा, प्रच्छना, | | पिपृच्छिषा, | परीपृच्छा ; |
| प्रच्छनम्, | प्रच्छनम्, | पिपृच्छिषणम्, | परीपृच्छनम् ; |
| पृष्ट्वा, | प्रच्छयित्वा, | पिपृच्छिषित्वा, | परीपृच्छित्वा ; |
| [5]आपृच्छ्य, | सम्प्रच्छ्य, | प्रपिपृच्छिष्य, | प्रपरीपृच्छ्य ; |
| प्रच्छम् २,<br>पृष्ट्वा २, | प्रच्छम् २,<br>प्रच्छयित्वा २, | पिपृच्छिषम् २,<br>पिपृच्छिषित्वा २, | परीपृच्छम् २ ;<br>परीपृच्छित्वा २. |

---

1. ‘क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजु श्रीणां दीर्घोऽसम्प्रसारणं च’ (वा. 3-2-178) इत्यनेन क्विपि दीर्घेऽसंप्रसारणे च विहिते सति, ‘च्छ्वोः शूडनुनासिके च’ (6-4-19) इति क्विब्निमित्तके शकारे, तस्य षत्वे जश्त्वे चर्त्वे च रूपमेवम् ।

2. क्तप्रत्यये सम्प्रसारणादिकं सर्वं यथायथमूह्यम् ।

3. भावेऽकर्तरि च कारके, ‘यजयाचयतविच्छप्रच्छरक्षो नङ्’ (3-3-90) इति नङ्प्रत्ययः। ‘च्छ्वोः शूड्—’ (6-4-19) इति सतुक्कस्य छकारस्य शकारः। ‘प्रश्ने चासन्नकाले’ (3-2-117) इति सूत्रकारनिर्देशप्रामाण्यात् सम्प्रसारणं न भवति। ‘**शात्**’ (8-4-44) इति निषेधात् श्चुत्वं न।

4. भिदादेः (3-3-104) आकृतिगणत्वात् अङि, सम्प्रसारणे च **पृच्छा** इति रूपमिति **आत्रेयादीनां** मतमिति **मा. धा. वृत्तिः**।

5. ल्यपि, सम्प्रसारणे रूपमेवम्। ‘च्छ्वोः शूठ्—’ (6-4-19) इति शकारादेशो न भवति, ल्यपो बहिरङ्गत्वात्।

A. ‘उक्तं **पिपृच्छिषूणां** वो मा स्म भूत सुषुप्सवः ॥’ भ. का. 7.98.